संस्कृतवार्ताः

03.10.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· राष्ट्रपति: द्रौपदी-मुर्मु: विद्यार्थिभि: व्यवहार-क्रियाकलापेषु सुदृढ-नैतिकमूल्यं आत्मसात्कर्तुं आग्रहं कृतवती।

· हरियाणा-प्रदेशे विधानसभेय निर्वाचनानाञ्चकृते प्रचाराभियानमद्य सायं समाप्तिं प्रति यास्यति। मतदानं शनिवासरे भविष्यति।

· आकाशवाण्यां प्रधानमन्त्रिण: नरेन्द्रमोदिन: प्रख्यातस्य मनकीबातइति रेडियो-कार्यक्रमस्य अद्य दशवर्षाणि सम्पूरितानि।

· प्रवर्तननिदेशालयेन अद्य पूर्व-क्रिकेटक्रीडक: मोहम्मद-अजहररूद्दीन: हैदराबाद-क्रिकेट-संघ-सम्बद्धे धनशोधनप्रकरणे आहूत:।

<u>राष्ट्रपति:-विद्यार्थिन:</u>

राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया विद्यार्थिन: समाहूता: यत्तै: स्वीये जीवने कदापि तादृशं कार्यं नैव करणीयम्, येन तेषां चरित्रं मलिनं भवेदिति। अनया समुदीरितं यत् समुचितनैतिकमूल्यं तेषां जीवनस्य अभिन्नाङ्गत्वेन भवेदिति। राष्ट्रपति: उदयपुरे आयोजितं मोहनलाल-सुखाड़िया-विश्वविद्यालयस्य दीक्षान्त-समारोहं सम्बोधयन्ती आसीत्। राष्ट्रपति: अग्रे प्रावोचत् यत् बाबा-साहेब-भीमराव-अम्बेडकरस्य मान्यता आसीत् यत् शिक्षया अधिकं मूल्ययुतं महत्वपूर्णञ्च चरित्रं वर्तते। राष्ट्रपति: उक्तवती यत् एकविंशतिशताब्द्यां प्रत्येकस्मिन् क्षेत्रे द्रुतगत्या परिवर्तनं भवतीति। परिवर्तनमिदं ज्ञान-विज्ञान-प्रौद्यौगिकीनां क्षेत्रेऽपि संवर्धमानमस्ति। श्रीमतिमुर्मु: विद्यार्थिभि: स्वगत-महत्वाकांक्षा-सामाजिक-संवेदनशीलतयोर्मध्ये समन्वयं स्थापयितुमपि आग्रहं कृतवती। राष्ट्रपति: श्व: माउण्टआबू इत्यत्र प्रजापिता-ब्रह्मकुमारी -ईश्वरीय-विश्वविद्यालयद्वारा आयोक्ष्यमाणे वैश्विक शिखरसम्मेलने भागं भजिष्यति। अपि च राज्यसर्वकारेण आयोक्ष्यमाणे आदि-गौरव-सम्मान-समारोहेऽपि सम्मिलिता भविष्यति।

हरियाण विधानसभानिर्वाचनम्

हरियाणा-प्रदेशे विधानसभेय निर्वाचनानाञ्चकृते प्रचाराभियानमद्य सायं समाप्तिं प्रति यास्यति। नवति: सदस्यात्मिकाया: विधानसभाया: कृते एकस्मिन्नेव चरणे शनिवासरे मतदानं भविष्यति। मतगणना च अक्तूबर-अष्टम-दिनांके जम्मू-कश्मीर-राज्येन सहैव भविष्यति। हरियाणायां निर्वाचनाभियानस्य अन्तिम-दिवसे विभिन्न-दलीय-नेतार: स्वीय-प्रत्याशिनां कृते जनानां समर्थनमवाप्तुं अनेका: जनसभा: कुर्वन्ति। भाजपा-दलस्य वरिष्ठ: नेता, असम राज्यस्य मुख्यमन्त्री च हिमंता बिस्व सरमा पलवल-क्षेत्रे जन-आशीर्वाद-जनसभां सम्बोधितवान्। उत्तराखण्डस्य मुख्यमन्त्रिणा पुष्कर-सिंह-धामिना अपि जनसभा एका सम्बोधिता।

मन की बात-दशवर्षाणि

प्रधानमन्त्रिण: नरेन्द्रमोदिन: प्रख्यात: मनकीबातइति रेडियो-कार्यक्रम: अद्य दशवर्षाणि सम्पूरितवान्। चतुर्दशाधिक-द्विसहस्रतमवर्षे अस्मिन्नेव दिवसे प्रधानमन्त्रिणा मनकीबात कार्यक्रमे निजविचारा: प्रकटिता:। एतेषां दश-वर्षाणां यात्राकाले प्रधानमन्त्री सामाजिक-सांस्कृतिक-पर्यावरण-व्यावहारिक-विषयाणां सकारात्मपक्षं प्रकाशितवान्।

प्रर्वतनिदेशालय:

प्रवर्तननिदेशालयेन अद्य क्रिकेटक्रीडकात् राजनेतापदारूढ: मोहम्मद-अजहररूद्दीन: हैदराबाद-क्रिकेट-संघ-सम्बद्धे धनशोधनप्रकरणे आहूत:। हैदराबाद-क्रिकेट-संघस्य पूर्वाध्यक्षे मोहम्मद-अजहरूद्दीने तस्य कार्यकाले धन-हस्तान्तरणस्य आरोप: प्रख्यापित:। इदं प्रथमवारमस्ति यत् कांग्रेसनेता एष: निदेशालयेन आहूत: यत्र निरीक्षण-अन्तर्गत-वित्तीय-व्यवहारयो: स्वभूमिकां स्पष्टीकर्तुं निदेशालयस्य समीपे उपस्थितो भवितुं निर्देशा: प्रख्यापिता:।

महाराष्ट्र घटस्थापना

महाराष्ट्रे शारदीय-नवरात्रि-पर्व-हर्षोल्लासेन समं प्रारब्धम्। अद्यप्रभृति नव-दिवसात्मकं यावत् दुर्गा-देव्या: नव-रूपाणां पूजा-अर्चना भविष्यति। प्रथम-दिवसे देव्या: शैलपुत्री-स्वरूपस्य पूजा भवति। महाराष्ट्रे एतेषु नवदिवसेषु शक्तिपीठेषु अन्यतम: कोल्हापुर-जनपदे देव्या: अम्बाबाई, धाराशिव-जनपदे तुलजाभवानी, मुम्बय्यां मुम्बादेव्या: पूजनं नवरात्र-उत्सवेषु प्रारब्धम्।

## भारत-श्रीलंका

विद्यालय-महाविद्यालयीय-छात्रेभ्य: अन्तरिक्ष-प्रविधि-विषय-सम्बद्ध-सूचनां प्रदातुं भारत-श्रीलंका-देशयोर्मध्येअद्य चेन्नई नगरे सन्धि-पत्रमेकं हस्ताक्षरितम्। अस्या: परियोजनाया: उद्देश्यं जाफनानगरे प्राशासनिक-विद्यालयस्य छात्रैस्साकं भारतीय-छात्रेभ्य: संयुक्त-रूपेण उपग्रह-विकास-प्रक्षेपणस्य प्रविध्यां विषये सूचना प्रदानमस्ति। श्रीलंका-सूचना-प्रविधि-संस्थाया: अध्यक्षेण इंडी-पथमनाथेनोक्तं यत् परियोजनैषा सहयोगं विवर्धयिष्यति, एतेन देशस्य भावि-नागरिका: विज्ञान-आभियान्त्रिकी-क्षेत्रयो: अधिका: कुशला: भविष्यन्ति।

## चिकित्सका:-प्रदर्शनम्

पश्चिमबङ्गालराज्ये सहस्राधिकं कनिष्ठवर्गीया: चिकित्सका: कोलकातायां महालया इत्यस्या: अवसरे क्षेत्राणां जनै: सहमिलित्वा एका-विशाल-विरोधपदयात्रां निष्कासितवन्त: एतस्यां पदयात्रायां राज्यप्रशासनेन सञ्चालितस्य आर-जी-कर चिकित्सकीय-महाविद्यालयस्य प्रशिक्षु-महिला-चिकित्सिकाया: दुष्कर्म-हत्ययो: अन्तर्गतं न्याय-अभ्यर्थना सम्मिलितासीत्।

## जयशंकर:

विदेश-मन्त्री डॉ. एस् जयशंकर: श्व: श्रीलंका-देशीय-आधिकारिक-यात्रायां तत्र सम्प्राप्स्यति। स्वीय यात्रावधौ असौ तत्रत्य विदेश-मन्त्रालयीय-अधिकारिभि: सह मेलनं विधास्यति। पारस्परिक-सहयोग-विषये ऽपि चर्चा संभाव्यते।

## भाजपा-मादक-द्रव्य-पदार्थ

भारतीय-जनता-पार्टीति दलेन आरोपितम् यत् दिल्ल्यां ह्य: मादक-द्रव्य-पदार्थ-गुल्मम् अधिगृहीतम्। तस्य गुल्मस्य मुख्य-आरोपी कांग्रेस-दलीयो वर्तते। अद्य नवदिल्ल्यां सूचनां प्रवदन् प्रवक्ता सुधांशु त्रिवेदी आरोपितवान् यत् मुख्य-आरोपी कांग्रेस-आर.टी.आई एकांशस्य प्रमुखो वर्तते। अत्र पञ्चसहस्र-षट्-शत्-कोट्याधिक-मादक-द्रव्य-पदार्था: अधिगृहीता:।

## बिहार-जलपूर:

बिहार-प्रदेशे जलपूर स्थिति: बहुषुक्षेत्रेषु दरीदृश्यते। तत्रत्य नद्य: संकट-चिह्नमति क्रम्य प्रवहन्ति। जलाप्लावनात् पञ्चलक्षोत्तर-जना सप्तदश जनपदानि च दुष्प्रभाविता: सन्ति। गण्डक-कोसी-महानन्दा-बागमती-अन्य नद्याश्च संकचिह्नमतिक्राम्य प्रवहन्ति। अस्मदीयेन वार्ताहिरेण विज्ञापितं यत् तत्रत्य दुष्प्रभावित-जना: सुरक्षित-स्थलेषु गता: सन्ति।

## हरिकेन-हेलेन

संयुक्त-राष्ट्र-अमेरिकायां हरिकेन हेलेन-इति सामुद्रिक-चक्रवातेन मृत्कानां संख्या त्र्यशीत्युत्तरैक शतं सञ्जातास्ति। सहस्राधिका: जनाश्च दक्षिण-पश्चिमीय-राज्येषु झञ्झावते अस्मिन् विलुप्ता: सूच्यन्ते। उत्तरीय-कारोलिनायां न्यूनातिन्यूनं नवति: जना: मृता: जाता:। वैद्युतिक-व्यवस्था अपि छिन्ना तत्र वर्तते। संयुक्त-राष्ट्र-अमेरिकाया: राष्ट्रपतिना जो-बिडेन वर्येण एतर्थं रक्षा-विभाग: निर्दिष्ट:।

## पादकन्दुक-क्रीडा

भूवनेश्वरस्य कलिङ्ग-क्रीडाङ्गणे अद्य समायोक्ष्यमाणायां इण्डियनसुपर-लीग-इत्येतस्यां प्रतिस्पर्धायां ओडिशा-एफसीइत्यस्य सामुख्यं केरल-ब्लास्टर्स एफसी इत्यनेन दलेन साकं भविष्यति। प्रतिस्पर्धाया: प्रसारणं सायं सार्ध सप्तवाहनतो: क्रीडिष्यते।

## क्रिकेट- प्रतिस्पर्धा

संयुक्तअरब-अमीरातदेशस्य शारजाह्-क्रिकेट-क्रीडाङ्गणे महिलानां आई.सी.सी. इत्येतस्या: विंशति-प्रति विंशति: प्रतिस्पर्धाया: नवमस्य संस्करणस्य औद्घटनिके द्वन्द्वे बाङ्गलादेशदलेन स्कॉटलैण्डदलस्य समक्षे विंशत्यधिकैकशतं धावनांकानां लक्ष्यं स्थापितम्। श्व: भारतीयदलस्य प्रतिस्पर्धा न्यूजीलैण्डदलेन सह निर्धारिता स्यादिति। तदनु रविवासरे भारत-पाकिस्तान-दलयोर्मध्ये द्वन्द्वं निश्चितमस्ति।

।। इति वार्ताः।।